Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 25

No. of Printed Pages – 7

**SS–12-Sanskrit Sah.**

यहाँ से काटिए

# उच्च माध्यमिक परीक्षा, 2016

## SENIOR SECONDARY EXAMINATION, 2016

## संस्कृत साहित्यम्

समय : 3¼ (सपाद होरात्रयम्)

पूर्णाङ्क : 80

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए



Download from www.MsEducationTv.com

# खण्ड – क

1) अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

भारतस्य पुनरुत्थानं भवेत् । तत्र नास्ति सन्देह: । किन्तु तत् पुनरूत्थानं जडसामर्थ्येन न, अपितु आत्मसामर्थ्येन अत: वस्तुत: भवद्भि: सर्वत्यागार्थं सिध्दै: भवितव्यम् । त्यागं विना किमपि महत् कार्यं न सिध्दयति । अस्माभि: कार्यं कुर्वद्भि: एव भवितव्यम् । सदा कार्यशीलै: भवितव्यम् । फलं स्वयमेव प्राप्यते । भविष्यं किं स्यात् इति न जानामि अहम् । तस्य ज्ञाने मम इच्छा अपि नास्ति । किन्तु एकं चित्रं तु मम नयनयो : स्फुटं दृश्यते ।

i) भारतस्य पुनरुत्थानं कथं भवितव्यम्? (एकपदेन उत्तरम्) [1]

ii) कं विना किमपि महत् कार्यं न सिध्दयति? (पूर्णवाक्येन उत्तरम्) [1]

iii) भविष्यं किं ...... अहम् । इत्यत्र 'अहम्' इति कर्तृपदस्य क्रियापदं किम्? [1]

2) निम्नलिखितम् अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

वृक्षा: भूमौ उद्भवन्ति। वृक्षा: अपि मनुष्य इव भुक्त्वा पीत्वा च जीवन्ति । मूलानि वृक्षाणां मुखानि भवन्ति । ते पादै: जलं पिबन्ति अत एव पादपा: कथ्यन्ते । तेषां मूलानि भूमित: रसं गृहीत्वा सर्वेषु अवयवेषु नयन्ति, तेन ते प्रवर्धन्ते: पुष्पन्ति, फलन्ति। वृक्षा: अपि वर्षा शीतातपै: प्रभाविता: भवन्ति । तेऽपि सुखानि दु:खानि च अनुभवन्ति । तेषु अपि प्राणा: भवन्ति, अतएव ते प्राणिन: इव जायन्ते, वर्धन्ते, पुष्पन्ति, फलन्ति, म्रियन्ते च । ते कदापि खगमृगजलचरनरा: इव न विचरन्ति अत: अचरा: कथ्यन्ते। बहूपकुर्वन्ति वृक्षा: प्राणिनाम् । वृक्षा: अशरणानां शरणम्, बुभुक्षितानां भोजनम्, संतप्तानां समाश्रया: वृष्टिकारका: सन्ति । वृक्षारोपणं वृक्षरक्षणं च अस्माकं रक्षायै परमावश्यकम् ।

i) वृक्षाणां मुखानि कानि भवन्ति? (एकपदेन उत्तरम्) [½]

ii) वृक्षा: कुत्र उद्भवन्ति? (एकपदेन उत्तरम्) [½]

iii) के पादपा: कथ्यन्ते? (पूर्ण वाक्येन उत्तरम्) [2]

iv) बहूपकुर्वन्ति वृक्षा: प्राणिनाम् इत्यस्मिन् वाक्ये 'उपकुर्वन्ति' इति क्रिया पदस्य कर्तृपदम् किम्? [1]

v) तेषु अपि प्राणा: भवन्ति। अस्मिन् वाक्ये ''तेषु'' इति सर्वनामपदं कस्य संज्ञा पदस्य स्थाने प्रयुक्तम्। [1]

vi) 'चरा:' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत । [1]

vii) वृक्षा: वृष्टिकारका: सन्ति । इत्यत्र विशेष्य पदं किम्? [1]

viii) गद्यांशस्य समुचितं शीर्षकं लिखत । [2]



Download from www.MsEducationTv.com

## खण्ड – ख

3) प्रदत्त रूपरेखया कथासंयोजनं करणीयम्– [1 × 8 = 8]

.......... वृध्दा । ............ त्रयः पुत्राः । ज्येष्ठपुत्रं सा युध्दं ......... । सः ....... मृतः। द्वितीयं, तृतीयं च ..... प्रेषयति । ......... मृतौ । ...... रोदिति। वृद्धा कथयति चतुर्थः ......... नास्ति खलु इति रोदिमि ।

अथवा

क्रम रहितानि वाक्यानि समुचित क्रमानुसारं विलिखत –

i) सः प्रतिदिनं प्रतिद्वारं भिक्षाटनं करोति ।

ii) एकः भिक्षुकः ।

iii) देवदर्शनतः पूर्वं गङ्गायां स्नानं करोति ।

iv) विश्वनाथदेवस्य दर्शनाय काशीं गच्छति ।

v) सः अपि देवं स्थापयति ।

vi) गङ्गातटे धनपात्रस्य उपरि देवं स्थापयति ।

vii) अन्ये यात्रिकाः अपि तथैव कुर्वन्ति ।

viii) एकः यात्रिकः आगच्छति ।

4) प्रदत्तं संकेतानुसारं वर्णनं लिखत – (80 शब्दाः) [4]

सत्सङ्गतिः, मानवः, प्राप्नोति, बुध्दिः, सज्जनैः, सज्जनः असज्जनैः, असज्जनः, जनैः, सत्सङ्गतेः, सुखम्, मनः, पवित्रम, सर्वे, आदरम, पूज्यः ।

अथवा

संस्कृत भाषा, प्राचीनतमा, शुध्दं, संस्कृतम्, संस्कृतिः संस्कृते, वेदाः भारतस्य, जननी, भाषा, सरला, सङ्गणकस्य, विज्ञानम्, ज्ञानम्, वयं, संस्कृत, संस्कृतेन, कुरु ।

## खण्ड – ग

5) अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

भवादृशा एव भवन्ति भाजनान्युपदेशानाम् । अपगतमले हि मनसि विशन्ति सुखनोपदेशगुणाः । हरति अतिमलिनमपि दोषजातं गुरुपदेशः गुरुपदेशस्य नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् । विशेषेण तु राज्ञाम् । विरला हि तेषामुपदेष्टारः । राजवचनमनुगच्छति जनो भयात् । उपदिश्यमानमपि ते न श्रृण्वन्ति ।

i) कदा मनसि सुखेनोपदेशगुणाः विशन्ति? (एकपदेन उत्तरम्) [1]

ii) गुरुपेदशः किं हरति? (पूर्णवाक्येन उत्तरम्) [1]

iii) अखिलमल प्रक्षालनक्षमम् ...... स्नानम्। इत्यत्र विशेषणपदेन अन्विर्तिं कुरुत । [1]

iv) उपदिश्यमानोऽपि ते न शृण्वन्ति । इत्यत्र वाक्ये शृण्वन्ति इति क्रियापदस्य कर्तृपदं किम्? [1]



Download from www.MsEducationTv.com

**6)** अधोलिखितं मन्त्रं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

विद्यां चाविद्यां च यस्तद्वेदोभयं स ह ।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।

i) कया अमृतम् अश्नुते? (एकपदेन उत्तरम्) **[1]**

ii) किम् उभयं वेद? (पूर्णवाक्येन उत्तरम्) **[1]**

iii) मन्त्रे ज्ञानस्य पर्याय: क:? **[1]**

iv) स ह अविद्यया ........ अश्नुते । इत्यत्र 'अश्नुते' इति क्रियापदस्य कर्तृ पदं किम्? **[1]**

**7)** निम्नाङ्कितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

लव: – 'अश्वमेघ' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वल:

सर्वक्षत्रपरिभावी महान् उत्कर्ष निकष: ।

योऽयमश्व: पताकेयमथवा वीरघोषणा ।

सप्तलोकैकवीरस्य दश कण्ठ कुलद्विष: ।।

लव: – अहो ! संदीपनान्यक्षराणि ।

वटव: – किमुच्यते? प्राज्ञ: खलु कुमार: ।

लव: – भो भो: । तत्किमक्षत्रिया पृथिवी? यदेवमुद्घोष्यते?

रे, रे, महाराजं प्रति क: क्षत्रिय:?

i) कुमार: कीदृश:? (एकपदेन उत्तरम्) **[1]**

ii) अयमश्व: कस्य वर्तते? (पूर्णवाक्येन उत्तरम्) **[1]**

iii) ''संदीपनानि अक्षराणि'' इत्यत्र विशेष्यपदं किम् ? **[1]**

iv) 'ध्वज:' इति पदस्य पर्याय: क: ? अस्मिन् नाट्यांशे । **[1]**

**8)** निम्नलिखित शब्दयो: हिन्दीभाषायाम् आङ्लभाषायां वा अर्थं लिखत । **[1 + 1 = 2]**

i) अध्वरे

ii) प्रयाति



Download from www.MsEducationTv.com

9) रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – [1 + 1 + 1 + 1 = 4]

i) जगत्सर्वम् ईशावास्यम् अस्ति ।

ii) कौत्स: प्रपेदे वदतन्तुशिष्य: ।

iii) योग: कर्मसु कौशलम् ।

iv) विक्रमार्को राजा यज्ञं करोति ।

10) निम्नांकित वाक्ययो: भावार्थ: हिन्दी भाषायां संस्कृते आङ्लभाषायां वा लेखनीय: –

[2 + 2 = 4]

i) शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ।

ii) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।।

11) अधोलिखितस्य श्लोकस्य अन्वयं लिखत – [2]

दातव्यं भोक्तव्यं धनविषये सञ्चयो न कर्त्तव्य: ।

पश्येह मधुकरीणां सञ्चितमर्थं हरन्त्यन्ये ।।

12) निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

i) कल्पेत लोकस्य कथं तमिस्रा [1 + 1 = 2]

इत्यस्मिन् कर्तृक्रिययो: चयनं कुरूत ।

ii) त्वं नियतं कर्म कुरू । इत्यत्र विशेषण पदं किम् । [1]

iii) तस्या: विवाहस्य अद्य तृतीयो दिवस: । [1]

इत्यत्र रेखांकित पदस्य स्थाने संज्ञापदस्य प्रयोगं कृत्वा वाक्यं पुन: लिखत ।

iv) वयं मुखेन कथयितुं शक्नुम: । इत्यत्र सर्वनाम पदस्य चयनं कुरुत । [1]

v) ते दु:ख-दु:खेन समयम् अति वाहयन्ति । [1]

इत्यत्र रेखांकितपदस्य पर्याय बोधकं पदं लिखत ।

vi) ते पशुभ्योऽपि निकृष्टतरा श्च । इत्यत्र रेखांकित पदस्य विलोमार्थकपदं लिखत । [1]

vii) ‘‘गर्भेश्वरत्वमभिनवयौवनम्’’। इत्येतत् वाक्यं क: कस्मै कथयति? [1]



Download from www.MsEducationTv.com

13) प्रबन्ध पारिजातस्य लेखकः कः? [1]

14) शिवराज विजयस्य रचनाकारः कः? [1]

15) महाकविना भवभूतिनि कति नाटकानि रचितानि? [1]

16) श्रीमद्भगवद्गीतायां कति श्लोकाः सन्ति? [1]

17) दारा शिकोहस्य पितुः नाम किम्? [2]

18) ई शावास्योपनिषद् कस्य वेदस्य अस्ति? [1]

19) श्रीचन्द्रशेखरदास वर्मणः कथासंग्रहस्य नाम किम्? [1]

20) i) अन्तगुरूः कः गणः कथ्यते?

ii) प्रतिचरणं अष्टवर्णाः कस्मिन् छन्दसि भवन्ति?

[2]

21) अधोलिखितेषु कथोश्चिद् द्वयोः लक्षणोदाहरणे लिखत – [1½ + 1½ = 3]

i) वंशस्थम्

ii) शार्दूल विक्रीडितम्

iii) उपजाति



Download from www.MsEducationTv.com

22) निम्नलिखित पंक्तिषु छन्दस: नामोल्लेखं कुरुत – [1 + 1 + 1 = 3]

i) आपद्गतं च न जहाति ददाति काले ।

ii) अथ च मम स पुत्र: पाण्डवानां तु पश्चात् ।

iii) दीर्घग्रीव: स भवति, खुरास्तस्य चत्वार एव ।

23) उपमान–उपमेययो: भेदे सादृश्यकथने कोऽलंकार: भवति? तस्य परिभाषा लेखनीया । [2]

24) अधोलिखितयो: कथोश्चिद् द्वयो: अलंकारयो: लक्षणोदाहरणे लिखत – [½ + 1 + ½ + 1 = 3]

i) श्लेष:

ii) यमकम्

iii) रूपकम्

25) अधोलिखितेषु पंक्तिषु अलंकारस्य नामोल्लेखं कुरुत –

i) हंसी व कृष्ण ते कीर्ति: स्वर्गगङ्गामवगाहते । [1]

ii) लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभ: । [1]

iii) लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन् । [1]

⊖⊖⊖



Download from www.MsEducationTv.com

DO NOT WRITE ANYTHING HERE

Download from www.MsEducationTv.com